Topic 37 अदादिगण हन् हिंसागत्योः

हन हिंसागत्योः हन्ति ।

झलि क्ङिति ।

अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ किति ङिति परे । यमि - रमि - नमि - गमि - हनि - मन्यतयोऽनुदात्तोपदेशाः । तनु - क्षणु - क्षिणु - ऋणु - तृणु - घृणु वनु - मनु - तनोत्यादयः । हतः । घ्नन्ति । हंसि । हथः । हथ । हन्मि । हन्वः । हन्मः । जघान । जघ्नतुः । जघ्नुः ।

अभ्यासाच्च ।

अभ्यासात् परस्य हन्तेर्हस्य कुत्वं स्यात् । जघनिथ । जघन्थ । जघ्नथुः । जघ्न । जघान, जघन । जघ्निव । जघ्निम । हन्ता । हनिष्यति । हन्तु, हतात् । हताम् । घ्नन्तु ।

हन्तेर्जः ।
हौ परे ।

असिद्धवदत्राभात् ।
इत ऊर्ध्वमापादसमाप्तेराभीयं समानाश्रयं तस्मिन् कर्तव्ये तदसिद्धम् । इति जस्यासिद्धत्वात् न हेर्लुक् । जहि । हतात् । हतम् । हत । हनानि । हनाव । हनाम । अहन्, अहताम्, अघ्नन् । अहन्, अहतम् । अहत । अहनम्, अहन्व, अहन्म । हन्यात् । P.T.O

यदि यहाँ से लेकर षष्ठाध्याय के अन्त तक कोई समानाश्रय-कार्य करना हो, तो पहले किया हुआ कार्य असिद्ध के समान होता है। ६।४।२२ के। 'जहि' में 'हन्तेर्जः' से 'ज' आदेश और 'अतो हेः' से 'हि' का लुक् समानाश्रय कार्य हैं, क्योंकि 'ज' का आश्रय प्रकृति 'हन्' और प्रत्यय 'हि' दोनों हैं तथा 'हि' लोप का आश्रय भी अदन्त अङ्ग 'ज' और प्रत्यय 'हि' दोनों ही हैं। अतः प्रकृत सूत्र से पहले किया हुआ 'ज' आदेश 'हि'-लोप करते समय असिद्ध हो जाता है, असिद्ध होने से लोप के प्रति 'हन्' ही रहता है जो अदन्त नहीं है। इसी से 'हि' का लोप न होकर 'जहि' रूप सिद्ध होता है।

आर्धधातुके।

हनो वध लिङि।

लुङि च

वधादेशोऽदन्तः। आर्धधातुके इति विषय-सप्तमी। तेनार्धधातुकोपदेशेऽकारान्तत्वादतो लोपः। वध्यात्। वध्यास्ताम्। अवधीत्। अहनिष्यत्। यु मिश्रणामिश्रणयोः।